कुण्डलञ्चापि दातव्यं तद्वद्धेमशलाकया ॥
फलानि सप्त चाष्टौ वा कलधौतानि कारयेत् ।
प्रत्येकं सर्व्ववृक्षाणां वेद्यां तानधिवासयेत् ॥
धूपश्च गुग्गुलुं श्रेष्ठं ताम्रपात्रैरधिष्ठितम् ।
सर्व्वान् धान्यभृतः कृत्वा गन्धमाल्यानुलेपनैः ॥
कुम्भान् स सर्व्ववृक्षेषु स्थापयित्वा व्रती स्वयम् ।
पूजयित्वा दिनान्ते च कुर्य्याद्द्विजनिमन्त्रणम् ॥
यथा च लोकपालानामिन्द्रादीनां विधानतः ।
वनस्पतेरधिवासमेवं कार्य्यं द्विजातिभिः ॥
ततः शुक्लाम्बरधरः सौवर्णकृतशेखराम् ।
स्वर्णशृङ्गीं कांस्यदोहां गां दद्याच्छुभशालि-
नीम् ॥
पयस्विनीं वृक्षमध्यादुत्सृजेन्नासदङ्सुखीम् ।
ततोऽभिषेकमन्त्रेण वाद्यमङ्गलगीतकैः ॥
ऋग्यजुःसामाथर्व्वाणां धारकैरभितस्तथा ।
तैश्च कुम्भैः संस्नपनं कुर्य्याद्ब्राह्मणपुङ्गवः ॥
शुक्लाम्बरधरः शुद्धो यजमानः स्वयं जपेत् ।
गोभिर्व्विभवतः सार्व्वानृत्विजस्तु समाहितः ॥
हेमसूत्रैः सकटकैरङ्गुलीयैः पवित्रकैः ।
वासोभिः शयनीयैश्च सहोपस्करपादुकैः ॥
क्षीरामिषैर्व्वलिं दद्यादृयावह्निचतुष्टयम् ।
होमश्च सर्पिषा कार्य्यो यवैः कृष्णतिलैरपि ॥
पलाशसमिधः शस्ताश्चतुर्थेऽह्नि तथोत्सवः ।
दक्षिणा च पुनस्तद्वत् श्रेष्ठा तत्रापि शक्तितः ॥
यद्यदिष्टतमं किञ्चित्तत्तद्द्यादमत्सरः ।
आचार्य्ये द्विगुणं दत्त्वा प्रणिपत्य समापयेत् ॥
अनेन विधिना यस्तु कुर्य्याद्वृक्षोत्सवं सदा ।
सर्व्वान् कामानवाप्नोति तत् वदानन्त्यमश्नुते ॥
यश्चैकमपि राजेन्द्र वृक्षं संस्थापयेद्बुधः ।
सोऽपि स्वर्गे वसेद्राजन् यावदिन्द्रशतत्रयम् ॥
भूतभव्यांश्च मनुजांस्तारयेद्रोमसंमितान् ।
परमां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभाम् ॥
य इदं शृणुयान्नित्यं श्रावयेद्वापि मानवः ।
सोऽपि संपूज्यते देवैर्ब्रह्मलोके महीयते ॥”

इति पाद्मे सृष्टिखण्डे २८ अध्यायः ॥ * ॥

वृक्षच्छेदने दोषो यथा,—
“तस्मान्न च्छेदयेत् वृक्षान् सुपुष्पफलितान् कदा ।
यदीच्छेत् कुलवृद्धिञ्च धनवृद्धिञ्च शाश्वतीम् ॥
सन्निधौ देवतानाञ्च श्मशानेष्वकचितानपि ।
छेदितांश्छेदयेल्लोकान् नरकस्थितिवृद्धये ॥
वृषहानिर्भवेच्छीघ्रं चिपाटच्चे निपातिते ।
सन्नियोगी क्षयं याति सीमावृक्षे निपातिते ।
तस्मान्न च्छेदयेद्वृक्षं देवताधिष्ठितं क्वचित् ॥
वापीकूपतडागानां छेदने रोधने कृते ।
कुलान्यकुलतां यान्ति नराणां सुदुरात्मनाम् ॥
तद्वच्च छेदयेद्यस्तु वृक्षान् छायासुशीतलान् ।
असिपत्रवने घोरे पीड्यते यमकिङ्करैः ॥
नगरोपवने वृक्षान् प्रमादाद्धि च्छिनत्ति यः ।
स गच्छेन्नरकं नाम कृम्भकं रौद्रदर्शनम् ॥
विल्वादिपातनं कुर्य्याच्छुभं भयदमन्यथा ।
श्रीवृक्षान्नोपयेत् यच यदि स्वर्गान्न हीयते ॥”
इत्याद्ये वह्निपुराणे वापारामप्रतिष्ठाध्यायः ॥

अथ वृक्षारोपणनक्षत्रादि । शतभिषा मूलं विशाखा मृगशिरः उत्तरफल्गुनी उत्तराषाढ़ा उत्तरभाद्रपत् रोहिणी हस्ता पुष्यः रेवती च ॥ * ॥ राजमार्त्तण्डे ।
“प्राजेशश्रवणोत्तरादितिमघामार्त्तण्डतिष्याश्विनी-
पौष्णानुराधमरीचयः शतभिषा स्वातिर्व्विशाखा तथा ।
जिवार्केन्दुसितेन्दुनन्दनदिने वारे स्थिरस्योदये
शस्यानां वपने भवन्ति लवने शस्ते तिथौ रोपणे ॥ * ॥
हेमाम्भसा वृक्षबीजं स्नातो मन्त्रेण रोपयेत् ।
वसुधेति सुशीतेति पुण्यदेति धरेति च ।
नमस्ते सुभगे नित्यं द्रुमोऽयं वर्द्धतामिति ॥” * ॥

अथ वृक्षप्रतिष्ठानक्षत्राणि । पुष्यः अश्विनी ज्येष्ठा पूर्व्वफल्गुनी धनिष्ठा मृगशिरः स्वाती आर्द्रा मघा रोहिणी मूलं हस्ता रेवती अनुराधा श्रवणा पुनर्व्वसुश्च । यथा हि ।
“पुष्याश्विशक्रभगदैवतवासवेषु
चन्द्रानिलेशमघरोहिणिमूलहस्ते ।
पौष्णानुराधहरिभेषु पुनर्व्वसौ च
कार्य्याभिषिक्तवरभूतपतिप्रतिष्ठा ॥” * ॥
अथ विहिततिथ्यादिः । भविष्ये ।
“प्रतिपच्च द्वितीया च तृतीया पञ्चमी तथा ।
दशमी त्रयोदशी चैव पौर्णमासी च कीर्त्तिता ॥
सोमो वृहस्पतिश्चैव शुक्रश्चैव तथा बुधः ।
एते सौम्यग्रहाः प्रोक्ताः प्रतिष्ठायागकर्म्मणि ॥”

इति ज्योतिस्तत्त्वम् ॥

वृक्षकः, पुं, कुटजवृक्षः । इति रत्नमाला ॥ वृक्षमात्रञ्च ॥ (यथा, रघुवंशे । १ ।३० ।
“सिक्तं स्वयमिव स्नेहाद्वन्ध्यमाश्रमवृक्षकम् ॥”)

वृक्षचरः, पुं, (वृक्षे चरतीति । चर+टः ।) वानरः । इति धनञ्जयः ॥

वृक्षच्छायं, क्ली, बहूनां वृक्षाणां छाया । यथा । वृक्षस्य वृक्षयोर्वा छाया वृक्षच्छाया वृक्षच्छायम् । बहुत्वे तु वृक्षच्छायमिति । महाच्छाया बहूनाञ्चेदिति क्लीवत्वम् । इति स्त्री नपुंसकलिङ्गसंग्रहे भरतः ॥

वृक्षधूपः, पुं, श्रीवेष्टः । इति राजनिर्घण्टः ॥

वृक्षनाथः, पुं, (वृक्षाणां नाथः ।) वटवृक्षः । इति शब्दरत्नावली ॥

वृक्षपाकः, पुं. वटवृक्षः । इति शब्दचन्द्रिका ॥

वृक्षभवनं क्ली, (वृक्षस्थितं भवनम् ।) वृक्षकोटरम् । इति शब्दचन्द्रिका ॥

वृक्षभक्षा, स्त्री, (वृक्षं भक्षयतीति । भक्ष+अण् । ततष्टाप् ।) वन्दाकः । इति भावप्रकाशः ॥

वृक्षभित्, **वृक्षभिद्**, } स्त्री,(वृक्षं भिनत्तीति । भिद्+क्विप् ।) वासी । इति हेमचन्द्रः ॥

वृक्षभेदी, [न्] पुं, (वृक्षं भिनत्तीति । भिद्+णिनिः ।) वृक्षादनः । इत्यमरः ॥ नेहानि इति भाषा ॥ टङ्कः । इति हेमचन्द्रः ॥

वृक्षमर्कटिका, स्त्री, (वृक्षस्य मर्कटिका ।) जन्तुविशेषः । काठ्विड़ाल इति भाषा । इति केचित् ॥

वृक्षरुहः, पुं, (वृक्षम्बदि भवतीति । भू+क्विप् ।) जलवेतसः । इति शब्दचन्द्रिका ॥

वृक्षरुहा, स्त्री, (वृक्षे रोहतीति । रुह+कः । ततष्टाप् ।) वन्दा । इत्यमरः ॥ अमृतस्रवा । इति राजनिर्घण्टः ॥

वृक्षवाटिका, स्त्री, (वृक्षस्य वाटिका ।) अमात्यगणिकागेहोपवनम् । इत्यमरः ॥

वृक्षादनः, पुं, (वृक्षमत्ति नाशयतीति । अद्+ल्युः ।) वृक्षभेदी । इत्यमरः ॥ नेहानि इति भाषा । (यथा, महाभारते । ५ । १५४ । ८ ।
“सकीलकवचाः सर्व्वे वासी वृक्षादनान्विताः ॥”) अश्वत्थवृक्षः । मधुच्छत्रम् । कुठारः । इति मेदिनी ॥ पियालः । इति धरणिः ॥

वृक्षादनी, स्त्री, (वृक्षमत्तीति । अद+ल्युः । स्त्रियां ङीष् ।) वन्दा । विदारीकन्दः । इति मेदिनी । ने, २१३ ॥

वृक्षादिरुहकं, **वृक्षादिरूढ़कं**, } क्ली, आलिङ्गनम् । इति शब्दमाला ॥

वृक्षाम्लं, क्ली, (वृक्षस्याम्लम् ।) महाम्लम् । तेन्तुलीति ख्यातम् । इति रायमुकुटः ॥ महादा । इति भरतादयः ॥ अम्लकुटा । इति सारसुन्दरी ॥ चुका । इति भानुदीक्षितादयः ॥ तत्पर्य्यायः । तिन्तिड़ीकम् २ चुक्रम् ३ । इत्यमरः ॥ अम्लशाकम् ४ चुक्राम्लम् ५ तिन्तिड़ीफलम् ६ शाकाम्लम् ७ अम्लपूरम् ८ पूराम्लम् ९ रक्तपूरकम् १० चुड़ाम्लम् ११ बीजाम्लम् १२ फलाम्लकम् १३ अम्लवृक्षम् १४ अम्लफलम् १५ रसाम्लम् १६ श्रेष्ठाम्लम् १७ अम्लम् १८ अम्लबीजम् १९ चुक्रफलम् २० । अस्य गुणाः । कटुत्वम् । कषायत्वम् । उष्णत्वम् । कफार्शस्तृष्णासमीरोदरहृद्गदादिगुल्मातिसारग्रहदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
“वृक्षाम्लमामममौष्णं वातघ्नं कफपित्तलम् ।
पक्वन्तु गुरु संग्राहि कटुकं तुवरं लघु ॥
अग्नीष्यं रोचनं रूक्षं दीपनं कफवातजित् ।
वृक्षाशोग्रहणीगुल्मशूलहृद्रोगजन्तुजित् ॥”

इति भावप्रकाशः ॥

वृक्षाग्रः, पुं, (वृक्षे अग्रो यस्य ।) आम्रातकः । इति शब्दचन्द्रिका ॥

वृक्षायुर्व्वेदः, पुं, (वृक्षस्यायुर्व्वेदः ।) तच्चिकित्सादिशास्त्रम् । तद्यथा,—

धन्वन्तरिरुवाच ।

“वृक्षायुर्व्वेदमाख्यास्ये प्लक्षश्चोत्तरतः शुभः ।
प्राग्वटो याम्यतस्त्वाम्रं आप्येऽश्वत्थं क्रमेण तु ।
दक्षिणां दिशमुत्पन्नाः समीपे कण्टकद्रुमाः ॥
उद्यानं गृहवासे स्यात् तिलान् वाप्यथ पुष्पितान् ।
गृह्णीयान्नोपयेद्वृक्षान् द्विजं चन्द्रं प्रपूजयेत् ॥
ध्रुवाणि पञ्च वायव्यं हस्तं प्राजेशवैष्णवम् ।